## अत इञ् । (९५/१०९५)

तस्यापत्यम् इत्येव । अकारान्तात् प्रातिपदिकात् इञ् प्रत्ययो भवति । अणोऽपवादः । दक्षस्यापत्यं दाक्षिः[1] । तपरकरणं किम् ? शुभंयाः, कीलालपाः [2]इत्यतो मा भूत् । कथं 'प्रदीयतां दाशरथाय मैथिली' (वा.रा. युद्ध. ९.२२)[3] ? [4]शेषविवक्षया भविष्यति ॥

## बाह्वादिभ्यश्च । (९६/१०९६)

बाहु इत्येवमादिभ्यः शब्देभ्यो[5]ऽपत्ये इञ् प्रत्ययो भवति । बाहविः । [6]औपबाहविः । अनकारार्थ आरम्भः । क्वचिद् बाधकबाधनार्थः[7] ।

बाहु । [8]उपबाहु । [9]विवाकु । [10]शिवाकु । [11]वटाकु । उपबिन्दु[12] । [13]वृक । चूडाला । मूषिका । [14]बलाका । भगला । [15]छगला । ध्रुवका । [16]धुवका । सुमित्रा । दुर्मित्रा । पुष्करसत् । [17]अनुहरत् । देवशर्मन् । अग्निशर्मन्[18] । कुनामन् । [19]सुनामन् । पञ्चन् । सप्तन् । अष्टन् । 'अमितौजसः सलोपश्च' (ग.सू. ६४) । उदञ्चु । शिरस् । [20]शराविन् । [21]क्षेमवृद्धिन् । [22]शृङ्खलातोदिन् । खरनादिन् । नगरमर्दिन् । प्राकारमर्दिन् । लोमन् । अजीगर्त । कृष्ण । [23]सलक । युधिष्ठिर । अर्जुन । साम्ब । गद । प्रद्युम्न । [24]राम । '[25]उदङ्कः सञ्ज्ञायाम्' (ग.सू. ६५) । 'सम्भूयोऽम्भसोः सलोपश्च' (ग.सू. ६६) ।

[३८५] बाह्वादिप्रभृतिषु [26]येषां दर्शनं [27]गोत्रभावे लौकिके ततोऽन्यत्र तेषां प्रतिषेधः । (म.भा. २.२५२)
बाहुर्नाम कश्चित्, तस्यापत्यं [28]बाहवः ।

[३८६] सम्बन्धिशब्दानां च तत्सदृशात् प्रतिषेधः । (म.भा. २.२५२)

[29]सञ्ज्ञा – श्वशुरस्यापत्यं श्वाशुरिः[30] । चकारोऽनुक्तसमुच्चयार्थः आकृतिगणतामस्य बोधयति । [31]जाम्बिः । ऐन्द्रशर्मिः । [32]आजधेनविः । आजबन्धविः । [33]औडुलोमिः ॥

## सुधातुरकङ् च । (९७/१०९७)

सुधातृशब्दादपत्ये इञ् प्रत्ययो भवति, तत्संनियोगेन च तस्याकङ् आदेशो [34]भवति । सुधातुरपत्यम् सौधातकिः ।

[३८७] व्यास[35]वरुडनिषादचण्डालबिम्बानामिति [36]वक्तव्यम् । (म.भा. २.२५३)
वैयासकिः । [37]बारुडकिः । नैषादकिः । चाण्डालकिः । बैम्बकिः ॥

---

1. प्लक्षस्य अपत्यं प्लाक्षिः इत्यधिकम् ब. क. ड. 2. इत्यत्र ह. 3. इति इत्यधिकम् ब. ड. इ. ह. 4. शेषविवक्षायामण् ब.ड.इ.ह. 5. अपत्यमित्येतस्मिन्नर्थे ड. 6. औपचाकलिः ह, औपचारविः क. 7. च इत्यधिकम् ब. 8. उपचाकुः ह. 9. निबाहुः ब, निचाकु ह, नास्ति ई. 10. नास्ति ह. 11. बिन्दु ब, चटाकु ह, बाटाकु क, उवाकु ई. 12. विद्युत् इत्यधिकम् ह, वृषली इत्यधिकम् फ. 13. चूडवृकला ब. ई, कृकला ह, वृकला क. 14. नास्ति ब. 15. प्रकला ह, कुशला क. 16. हरिबका ह, धृवका ई. 17. अनडुह ह. 18. भद्रशर्मन् सुशर्मन् इत्यधिकम् ब. ई. 19. नास्ति ह. 20. माषशराविन् ब. ह. 21. सुभिक्ष ह. 22. शृङ्खलभेदिन् ह. 23. नास्ति ह. 24. संकर्षण ह. 25. उदकात् क.ह. 26. एषां ब. 27. गोत्राभावे ब. 28. बाहविः क. 29. सञ्ज्ञायाम् क. 30. राजश्वशुरादिति यन्न भवति इत्यधिकम् ब.ई. 31. जांघ्रिः क.ह.ई. 32. आजधेनवः ह, आजधेनिविः क. 33. नास्ति ब. 34. भवति नास्ति ब.ई. 35. वरूड ड. 36. उपसंख्यानम् क.ई. 37. वारूडकि ड. म.भा.